नलदमु:, पुं, निम्बवृक्ष: । इति भूरिप्रयोग: ॥
नलदा, स्त्री, ( नलद+टाप् । ) जटामांसी । इति हेमचन्द्र: ॥
नलपट्टिका, स्त्री, ( नलनिर्म्मिता पट्टिका । ) तलाची । इति हारावली । १७७ ॥ दरमा इति भाषा ॥
नलमीन:, पुं, ( नलाश्रयो मीन: । ) चिलिचिम-मत्स्य: । इत्यमर: । १ । १० । १८ ॥ ( "नलमीन: कफात्मक: ।" इति हारीते प्रथमे स्थाने ११ अध्याये ॥ )
नलिका, स्त्री, ( नल इव आकारोऽस्त्यस्या इति । नल+ठन् । ) नाड़ी । नली इति ख्यात: । सा च उत्तरापथे प्रसिद्धा सुगन्धा प्रवाला-कृति: प्रवालीति क्वचित् प्रसिद्धा । पँठारी इति कश्चित् प्रसिद्धा । तत्पर्य्याय: । विद्रुम-लतिका २ कपोतचरणा ३ नलिनी ४ निर्म्मथ्या ५ शुषिरा ६ व्यामानी ७ सुला ८ रक्तदला ९ नर्त्तकी १० नटी ११ । अस्या गुणा: । तिक्त-त्वम् । कटुत्वम् । लोष्णत्वम् । मधुरत्वम् । कृमिवातोदरार्शोऽश्मशूलनाशित्वम् । मलशोध-नत्वञ्च । इति राजनिर्घण्ट: ॥ तन्नामगुणा: ।
"नलिका विद्रुमलता कपोतचरणा नटी ।
धमन्यञ्जनकेशी च निर्म्मथ्या शुषिरा नली ॥
नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत् ।
मूत्रकृच्छ्राश्मवातघ्नी श्वासकुष्ठकण्डुज्वरापहा ॥"
इति भावप्रकाश: ॥
(अस्त्रविशेष: । यथा, आर्य्यासप्तशत्याम् । ४३७ ।
"मधुमथनवदनविनिर्गतवंशीसुषिरानुसारिणो रागा: ।
जन्त हरन्ति मनो मम नलिकाविशिखा: स्मरस्येव ॥"
इयं हि व्याप्ततात्क्रयादिना व्याधुनिकनला-ख्यद 'बन्दुक' इति ख्यातस्य सादृश्यं गच्छति । यथा, वैशम्पायनोक्तधनुर्व्वेदे ।
"नलिका ऋजुदेहा स्यात्तन्वङ्गी मध्यरन्ध्रिका ।
मर्म्मच्छेदकरी तीक्ष्णा————————॥"
"ग्रहणं धापनञ्चैव सूतञ्चेति गतित्रयम् ।
तासामाश्रितं विदित्वा तु जेतास्यान् रिपून् युधि ॥"
अस्या विशेषविवरणन्तु नालिकशब्दे द्रष्टव्यम् ॥ कल्पितजलनिर्गमपथ: । यथा, यन्त्रविधि-शतके १ अध्याये ।
"वेदाङ्गुलं मस्तकोर्द्धे कार्य्यं तोयस्य धारणे ।
समर्था तत्र नलिका कुर्य्यात्तोयविमोचनीम् ॥")
नलित:, पुं, ( नल्यते इति । नल ज बन्धे+क्त: । ) शाकविशेष: । नालिता इति भाषा ॥ अस्य गुणा: । मधुरत्वम् । पित्तनाशित्वम् । शुक्र-वृद्धिकत्वञ्च । इति द्रव्यगुण: ॥
नलिनं, क्ली, ( नल्यते इति । नल बन्धे+"बहुल-मन्यत्रापि ।" उणा । २ । ४९ । इति इनच् । ) पद्मम् । इत्यमर: । १ । १० । ३९ ॥ ( यथा, भागवते । ३ । ६ । २२ ।
"यदास्य नाभ्यान्नलिनादहमासं महात्मन: ।
नाविदं यज्ञसम्भारान् पुरुषावयवादृते ॥" )
नीलिका । जलम् । इति हेमचन्द्र: । ४ । २२६ ॥
नलिन:, पुं, ( नल+इनच् । ) सारसपक्षी । इत्य-मर: । १ । १० । ४० ॥ लघ्वपाकफल: । इति शब्दचन्द्रिका ॥ पानीआमला इति भाषा ॥
नलिनी, स्त्री, ( नलानि पद्मानि सन्त्यत्र । नल+"पुष्करादिभ्यो देशे ।" ५।२।१३५ । इति इनि: । ङीप् । ) पद्मयुक्तदेश: । ( नलानां पद्मानां समूह: । "खलादिभ्य: इनिर्वक्तव्य: ।" ४।२।५१ । इत्यस्य वार्त्तिकोक्त्या इनि: ।) पद्मसमूह: । पद्म-लता । इति भरत: ॥ (अस्या: पर्य्यायो यथा,—
"नलिनी स्यात् पङ्कजिनी बिसिनी च सरोजिनी ।
पद्मिनीति च पर्य्याय: पद्मखण्डे तदाकरे ॥"
इति वैद्यकरत्नमालायाम् ॥ )
पद्ममात्रम् । इति रायमुकुटादय: ॥ तत्-पर्य्याय: । बिसिनी २ पद्मिनी ३ । इत्यमर: । १ । १० । ३९ ॥ ( यथा, मराष्टके । ८ ।
"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")
व्योमनिम्नगा । ( इयन्तु गङ्गाया: पूर्व्वदिग्गत-शाखाणामन्यतमा । यथा, मात्स्ये । १२० । ४० ।
"त्रीणि प्राचीमभिमुखं प्रतीचीं त्रीण्यथैव च ।
स्रोतांसि त्रिपथगायास्तु प्रत्यपद्यन्त सप्तधा ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ॥")
कमलाकर: । इति मेदिनी । ने, ८२ ॥ नलिका । इति राजनिर्घण्ट: ॥ नारिकेलसुरा । इति त्रिकाण्डशेष: ॥ ( वामनासिका । यथा, भाग-वते । ४ । २५ । ४८ ।
"नलिनी नालिनी च प्राग्द्वारावेकत्र निर्म्मिते ॥"
"नलनालशब्दौ छिद्रवचनौ तद्वती नलिनी नालिनी च वामदक्षिणनासिके ॥" इति तट्टीकायां स्वामी ॥ )
नलिनीरुहं, क्ली, ( नलिन्यां रोहतीति । रुह+क: । ) मृणालम् । इति राजनिर्घण्ट: ॥ ब्रह्माणि, पुं ॥
नलिनेशय:, पुं, ( नलिने शेते इति । शी+अच् ।) विष्णु: । इति त्रिकाण्डशेष: ॥
नली, स्त्री, ( नल+अच् । गौरादित्वात् ङीष् । ) मन:शिला । इति विश्व: ॥ नलिका । इति भाव-प्रकाश: ॥ तत्पर्य्याय: । शुषिरा २ विद्रुमलता ३ कपोताङ्घ्रि: ४ नटी ५ । इत्यमर: । २ । ४ । १२९ ॥ ( एतद्गुणा मन:शिलानलिकाशब्दयो: ज्ञातव्या: ॥)
नलोत्तम:, पुं, ( नलेषु उत्तम: । ) देवनल: । इति राजनिर्घण्ट: ॥
नल्व:, पुं, ( नल्यते इति । नल+उल्वादयश्चेति व: ।) किष्कुचतु:शतम् । चतु:शतहस्तपरिमित-देश: । इत्यमरभरतौ ॥ ( यथा, हरिवंशे । २२४ । १ ।
"तस्यां सभायां दैत्येन्द्रो हिरण्यकशिपुस्तदा ।
आसीन आसने दिव्ये नल्वमात्रे प्रमाणत: ॥")
नल्ववर्त्मगा, स्त्री, (नल्वपरिमितं वर्त्म गच्छतीति । गम्+ड: । ) काकाङ्गी । इति शब्दचन्द्रिका ॥ नल्वपरिमितपथगामिनि, त्रि ॥
नव, [ न् ] त्रि, ( नूयते स्तूयते प्रधानसंख्या-वाचकत्वेन । णु स्तवने+बाहुलकात् कनिन् गुणश्च । इत्युज्ज्वलदत्त: । १ । १५६ ।) संख्या-विशेष: । ९ नय इति भाषा । बहुवचनान्तो-ऽयम् । इति व्याकरणम् ॥ (यथा, रघु: । ३।६९ ।
"इति क्षितीशो नवतिं नवाधिकां
महाक्रतूनां महनीयशासन: ॥" )
नववाचका यथा । अङ्गद्वारम् १ भूखण्डम् २ छत्ररावणमस्तक: ३ सुधाकुण्डम् ४ व्याघ्री-स्तन: ५ सेवधि: ६ अङ्कम् ७ रस: ८ ग्रह: ९ । इति कविकल्पलता ॥ ( तद्वति, त्रि । यथा, मनु: । ३ । २६९ ।
"षण्मासान् छागमांसेन पार्षतेन च सप्त वै ।
अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥" )
नव:, पुं, ( णु शि स्तवने+"ऋदोरप् ।" ३।३।५७। इति भावे अप् । ) स्तव: । इति मेदिनी । वे १५ ॥ रक्तपुनर्नवा । इति राजनिर्घण्ट: ॥
नव:, त्रि, (नूयते स्तूयते इति । णु स्तुतौ+"ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ) नूतन: । इत्यमर: ।३।१।७७॥ (यथा, हितोपदेशे ।१।२३४।
"न स्त्रीणामप्रिय: कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥" )
अभिनवान्यौषधानि प्रशस्तानि । यथा,—
"द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ ।
ऋते घृतगुडक्षौद्रधान्यकृष्णाविडङ्गत: ॥"
इति नारायणदासकृतवैद्यपरिभाषा ॥
तद्देशिकपर्य्याय: । "नवम् १ नूतम् २ नूतनम् ३ नव्यम् ४ इदा ५ इदानीम् ६ । षट् नवनामानि ।" इति वेदनिघण्टौ ३ अध्याय: ॥
नवकारिका, स्त्री, ( नवं करोतीति । कृ+ण्वुल् । टापि अत इत्वम् । ) नवोढ़ा । इति शब्द-माला ॥ नूतन: संश्लिष्टो विवरणश्लोक: । नवीन-कर्त्री च ॥
नवकालिका, स्त्री, ( नवं कालं प्राप्नोतीति । कल+ण्वुल् । टाप् । अत इत्वम् । ) नवोढा । इति हारावली । १७६ ॥
नवग्रहा:, पुं, ( नव ग्रहा: । ) सूर्य्यादयो नव । यथा, तिथितत्त्वे ।
"नवग्रहमखं कृत्वा तत: कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥"
( यथा च,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पति: ।
शुक्र: शनैश्चरो राहु: केतुश्चेति नवग्रहा: ॥")
तेषां संस्थानम् । यथा,—
"भूमेर्योजनलक्षे तु सौरं मैत्रेय । मण्डलम् ।
लक्षे दिवाकरस्यापि मण्डलं शशिन: स्थितम् ॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात् ।